योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०४२

अज्ञातलेखकः

श्रीवसिष्ठ उवाच ।

यस्त्वबुद्धमतिर्मूढो रूढो न वितते पदे ।

वज्रसारमिदं तस्य जगदस्त्यसदेव सत् ।। १

यथा बालस्य वेतालो मृतिपर्यन्तदुःखदः ।

असदेव सदाकारं तथा मूढमते जगत् ।। २

ताप एव यथा वारि मृगाणां भ्रमकारणम् ।

असत्यमेव सत्याभं तथा मूढमतेर्जगत् ।। ३

यथा स्वप्नमृतिर्जन्तोरसत्या सत्यरूपिणी ।

अर्थक्रियाकरी भाति तथा मूढधियां जगत् ।। ४

अव्युत्पन्नस्य कनके कानके कटके यथा ।

कटकज्ञप्तिरेवास्ति न मनागपि हेमधीः ।। ५

तथाऽज्ञस्य पुणुराजगनागेश्वमेखसुर् ।

इयं दृश्यदृगेवास्ति न त्वन्या परमाथदृक् ।। ६

यथा नभसि मुक्तालीपिच्छकेशोण्ड्रकादयः ।

असत्याः सत्यतां याता भात्येवं दुर्दशां जगत् ।। ७

दीर्मस्वप्नमिदं विश्वं विद्धाहन्तादिसंयुतम् ।

अत्रान्ये स्वप्नपुरुषा यथा सत्यास्तथा शृणु ।। ८

अस्ति सर्वगतं शान्तं परमार्थघनं शुचि ।

अचेत्यचिन्मात्रवपुः परमाकाशमाततम् ।। ९

तत्सर्वगं सर्वशक्ति सर्वं सर्वात्मकं स्वयम् ।

यत्र यत्र यथोदेति तथास्ते तत्र तत्र वै ।। १०

तेन स्वप्नपुरे द्रष्टा यान्वेत्ति पुरवासिनः ।

नरानिति नरा एव क्षणात्तस्य भवन्ति ते ।। ११

यद्द्रष्टुश्चित्स्वरूपं तत्स्वप्नाकाशान्तरस्थितम् ।

स्वप्नाकाशचित्ताभं हि नरानामेति भावितम् ।। १२

वेदितृत्वैक्यवशतो नरतेवावबुध्यते ।

आत्मन्यतश्चिद्बलेन द्वयोरप्येति सत्यता ।। १३

श्रीराम उवाच ।

स्वप्नेऽपि स्वप्नपुरुषा न सत्याः स्युर्मुने यदि ।

वद तत्को भवेद्दोषो मायामात्रशरीरिणि ।। १४

श्रीवसिष्ठ उवाच ।

स्वप्ने न पुरवास्तव्या वस्तुतः सत्यरूपिणः ।

प्रमाणमत्र शृणु मे प्रत्यक्षं नाम नेतरत् ।। १५

सर्गादावात्मभूर्भाति स्वप्नाभानुभवात्मकः ।

तत्संकल्पकलं विश्वमेव स्वप्नाभमेव तत् ।। १६

एवं विश्वमिदं स्वप्नस्तत्र सत्यं भवान्मम ।

यथैव त्वं तथैवान्ये स्वप्ने स्वप्नवरा नृणाम् ।। १७

स्वप्ने नगरवास्तव्याः सत्या न स्युरिमे यदि ।

तदिहापि तदाकारे न सत्यं मे मनागपि ।। १८

यथाहं तव सत्यात्मा सत्यं सर्व भवेन्मम ।

स्वप्नोपलम्भे संसारे मिथः सिद्धौ प्रमेदृशी ।। १९

संसारे विपुले स्वप्ने यथा सत्यमहं तव ।

यथा त्वमपि मे सत्यं सर्वं स्वप्नेष्विति क्रमः ।। २०

श्रीराम उवाच ।

स्वप्नद्रष्टरि निर्निद्रे तद्द्रष्टुः स्वप्नपत्तनम् ।

सद्रूपत्वात्तथैवास्ते ममेति भगवन्मतिः ।। २१

श्रीवसिष्ठ उवाच ।

एवमेतत्तथैवास्ते सत्यत्वात्स्वप्रपत्तनम् ।

स्वप्नद्रष्टरि निर्निद्रेऽप्याकाशविशदाकृति ।। २२

एतदास्तामिदं तावद्यज्जाग्रदिव मन्यसे ।

विद्धि तत्स्वप्नमेवान्तर्देशकालाद्यपूरकम् ।। २३

एवं सर्वमिदं भाति न सत्यं सत्यवत्स्थितम् ।

रञ्जयत्यपि मिथ्यैव स्वप्नस्त्रीसुरतोपमम् ।। २४

सर्वत्र विद्यते सर्वं देहस्यान्तर्बहिस्तथा ।

यत्तु वेत्ति यथा संवित्तत्तथा स्वैव पश्यति ।। २५

यत्कोशे विद्यते द्रव्यं तद्द्रष्ट्रा लभ्यते यथा ।

तथास्ति सर्वं चिद्व्योम्नि चेत्यते तत्त्वनेन वै ।। २६

अनन्तरमुवाचेदं देवी ज्ञप्तिर्विदूरथम् । ।

कृत्वा बोधामृतासेकैर्विवेकाङ्कुरसुन्दरम् ।। २७

एतदेव मया राजँल्लीलार्थमुपवर्णितम् ।

स्वस्ति तेऽस्तु गमिष्यावो दृष्टा दृष्टान्तदृष्टयः ।। २८

श्रीवसिष्ठ उवाच ।

इति प्रोक्ते सरस्वत्या गिरा मधुरवर्णया ।

उवाच वचनं धीमान्भूमिपालो विदूरथः ।। २९

विदूरथ उवाच ।

ममापि दर्शनं देवि मोघं भवति नार्थिनि ।

महाफलप्रदायास्तु कथं तव भविष्यति ।। ३०

अहं देहं समुत्सृज्य लोकान्तरमितोऽपरम् ।

निजमायामि हे देवि स्वप्नात्स्वप्नान्तरं यथा ।। ३१

पश्यादिशाशु मां मातः प्रपन्नं शरणागतम् ।

भक्तेऽवहेला वरदे महतां न विराजते ।। ३२

यं प्रदेशमहं यामि तमेवायात्वयं मम ।

मन्त्री कुमारी चैवेयं बालेति कुरु मे दयाम् ।। ३३

श्रीसरस्वत्युवाच ।

आगच्छ राज्यमुचितार्थविलासचारु

प्राग्जन्ममण्डलपते कुरु निर्विशङ्कम् ।

अस्माभिरर्थिजनकामनिराकृतिर्हि

दृष्टा न काचन कदाचिदपीति विद्धि ।। ३४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलो० स्वप्नपुरुषसत्यत्वनिरूपणं नाम द्विचत्वारिंशः सर्गः ।। ४२ ।।